खर्व्वः कपोलद्युतिकामयुक्तो
हिन्दोलरागः कथितो मुनीन्द्रैः ॥"

तत्पुत्त्रा यथा, सङ्गीतदर्पणे ।
"आभीरः शुभ्रधवली चन्द्रकान्तविमोहकाः ।
चन्द्रकान्तः खेदवेदः हिन्दोलात्मजकीर्त्तितः ॥"
तस्य गानसमयो यथा,—
"हिन्दोलः पञ्चमः सिन्धुर्ललितश्च वसन्तकः ।
भखारी भटीयारी च गाययामि प्रगीयते ॥"
इति बृहत्सङ्गीतरत्नाकरः ॥ * ॥

हनुमन्मते षड्रागाणां मध्ये द्वितीयरागः । ब्रह्मणः शरीराद्विनिर्गतः । केचिन्मते नाभितः । अस्य जातिः औड़वः । अर्थात् ष ग म प नि इति पञ्चस्वरमिलितः । अस्य ग्रहं षड्जस्वरः । वसन्तर्त्तौ दिवाप्रथमभागे गानसमयः । रागमालायामस्य रूपम् । अल्पवयःसुन्दरः पीतवर्णः उत्तमाङ्गः स्वर्णमयहिन्दोलारूढ़ः सुसज्जितसुन्दरीस्त्रीभिः गीतं गायन्तीभिः हिन्दोलान्दोलयन्तीभिश्च सह परमानन्देन हास्यकौतुककारी । अस्य पञ्च रागिण्यः । यथा । रामकरी १ देशाखी २ ललिता ३ विलावली ४ पट्मञ्जरी ५ । अस्य पुत्त्रा अष्टौ यथा । चन्द्रबिम्बः १ मङ्गलः २ शुभः ३ आनन्दः ४ विनोदः ५ प्रधनः ६ गौरः ७ विभासः ८ ॥ * ॥ भरतमते अस्य रागिण्यो यथा । रामकली १ मालावती २ आशावरी ३ देवारी ४ गुणकली ५ । तन्मते पुत्त्रा यथा । वसन्तः १ मालवः २ [illegible] ३ कुसलः ४ शङ्करावन्दः ५ लङ्कादाहनः ६ नागध्वनः ७ धवलः ८ । एषां भार्य्या यथा । लीलावती १ कैरवी २ चयती ३ पूरवी ४ पारावती ५ तिरवणी ६ देवगिरी ७ सुरसती ८ । इति सङ्गीतशास्त्रम् ॥

हिन्दोलकः, पुं, (हिन्दोल एव । कन् ।) यानविशेषः । तत्पर्य्यायः । प्रेङ्खा २ दोला ३ । इति जटाधरः ॥ दोलिका ४ हिन्दोला ५ । इति हारावली ॥

हिन्दोला, स्त्री, (हिन्दोल+घञ्+टाप् ।) दोलिका । हिँदला इति भाषा । इति हारावली ॥

हिमं, त्रि, (हन्ति उत्ताषमिति । हन+"हनेर्ह्नि च ।" उणा० १ । १४६ । इतिमक् ह्नि च ।) शीतगुणविशिष्टः । शीतलवस्तु । तत्पर्य्यायः । सुषीमः २ शिशिरः ३ जड़ः ४ तुषारः ५ शीतलः ६ शीतः ७ । इत्यमरः । १ । ३ । १८ ॥ (यथा, सुश्रुते । ४ । २८ । "अपराह्णे हिमाभिरद्भिः परिषिक्तगात्रः शालीनां षष्टीकानाञ्च पयसा शर्करामधुरेणोदनमश्नीयात् ॥")

हिमं, क्ली, (हन+मक् । हन्तेर्ह्नि च ।) प्रकाशवाष्पः । तत्पर्य्यायः । अवश्यायः २ नीहारः ३ तुषारः ४ तुहिनम् ५ प्रालेयम् ६ महिमा ७ । इत्यमरः । १ । ३ । १८ ॥ इन्द्राग्निधूमः ८ खवाष्पः ९ रजनीजलम् १० । इति हारावली ॥ यथा, रघुः । ८ । ४५ ।
"अथवा मृदुवस्तु हिंसितुं
मृदुनैवारभते प्रजान्तकः ।
हिमसेकविपत्तिरत्र मे
नलिनी पूर्व्वनिदर्शनं मता ॥")
अस्य गुणः । कफवायुवर्द्धकत्वम् । इति राजवल्लभः ॥ चन्दनम् । इति मेदिनी ॥ पद्मकाष्ठम् । रङ्गम् । मौक्तिकम् । इति राजनिर्घण्टः ॥ नवनीतम् । इति शब्दचन्द्रिका ॥ शीतम् । इति हेमचन्द्रः ॥ (कर्पूरः । पर्य्यायो यथा,—
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि स स्मृतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हिमः, पुं,(हन+मक् हन्तेर्ह्नि च ।) चन्दनवृक्षः । इति हेमचन्द्रः । चन्द्रः । इति शब्दचन्द्रिका ॥ कर्पूरः । इति राजनिर्घण्टः ॥ हेमन्तर्त्तुः । स तु अग्रहायणपौषमासात्मकः । यथा,—
"हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु
स्नानतपनवनाश्रीहर्म्यगोचौरपानैः ।
सुखमनुभव राजंस्त्वद्द्विषो यान्तु नाशं
दिवसकमललज्जाशर्व्वरीरेणुपङ्काः ॥"
इति ऋतुसंहारः ॥
हिमालयपर्व्वतः । इति हिमजादिशब्ददर्शनात् ॥

हिमकः, पुं, (हिमेन कायतीति । कै+क ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

हिमकरः,पुं,(हिमः शीतलः करः किरणो यस्य ।) चन्द्रः । यथा,—
"इयं द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं स्नपय कृपया मामपि शिवे ! ।
अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपाती हिमकरः ॥"
इत्यानन्दलहरी ॥
कर्पूरः । इति राजनिर्घण्टः ॥

हिमकूटः, पुं,(हिमस्य कूटो यत्र ।) शिशिरर्त्तुः । इति राजनिर्घण्टः ॥ (हिमस्य कूट इति । हिमालयशृङ्गे, पुं, क्ली ॥ यथा, भागवते । ५ । १७ । ८ । "तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद् बहूनि गिरिकूटान्यतिक्रम्य हेमकूटहिमकूटान्यतिरभसतररंहा लुठतीति ॥")

हिमगिरिः, पुं, (हिमप्रधानो गिरिः ।) हिमालयपर्व्वतः । यथा,—
"धनुः पौष्पं मौर्व्वी मधुकरमयी पञ्च विशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ।
तथाप्येकः सर्व्वं हिमगिरिसुते ! कामपि कृपा-
मपाङ्गात्ते लब्ध्वा जगदिदमनङ्गो विजयते ॥"
इत्यानन्दलहरी ॥
(यथा च ।
"आग्नेया विन्ध्यशैलाद्याः सौम्या हिमगिरि-
मताः ॥"
इति पूर्व्वखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

हिमजः, पुं, (हिमात् हिमालयात् जायते इति । जन+डः ।) मैनाकगिरिः । इति मेदिनी ॥

हिमजा, स्त्री, (हिमात् हिमालयात् जायते इति । जन+डः । टाप् ।) पार्व्वती । शटी । इति मेदिनी ॥ क्षीरिणी । इति राजनिर्घण्टः ॥

हिमझण्टिः, पुं, (हिमानां कुज्झटिः । पृषोदरादित्वात् साधुः ।) कुज्झटिः । इति हारावली ॥ क्वचित् पुस्तके हिमझण्टिरिति पाठः ॥

हिमतैलं, क्ली, (हिमजातं तैलमिति ।) कर्पूरतैलम् । इति राजनिर्घण्टः ॥

हिमदुग्धा, स्त्री, (हिमवत् शुभ्रं दुग्धमस्याः ।) क्षीरिणी । इति राजनिर्घण्टः ॥

हिमदुर्द्दिनं, क्ली, (हिमेन दुर्द्दिनम् ।) हिमसमूहपातेन दुःखदायकदिनम् । तत्पर्य्यायः । पत्रहिमम् २ । इति त्रिकाण्डशेषः

हिमद्युतिः, पुं, (हिमा द्युतिर्यस्य ।) चन्द्रः । इति शब्दमाला ॥ (यथा, माघे । ९ । १२ ।
"अविभाव्यतारकमदृष्टहिम-
द्युतिविम्बमस्तमितभानुनभः ॥")

हिमद्रुमः, पुं, (हिमो द्रुमः ।) महानिम्बः । इति राजनिर्घण्टः ॥

हिमधातुः, पुं, (हिमो धातुरिव यत्र ।) हिमालयपर्व्वतः । इति केचित् ॥

हिमप्रस्थः, पुं, (हिमप्रधानः प्रस्थो यत्र ।) हिमालयः । इति हेमचन्द्रः ॥

हिमवत्सुतः, पुं, (हिमवतः सुतः ।) मैनाकपर्व्वतः । इति त्रिकाण्डशेषः ॥

हिमवत्सुता, स्त्री, (हिमवतः सुता ।) गङ्गा । इति धनञ्जयः ॥ (यथा, महाभारते ।३।१०९।८
"ततः पपात गगनाद् गङ्गा सा हिमवत्सुता ॥")
उमा च ।

हिमवान्, [त्] पुं, (हिममस्यास्तीति । हिम+मतुप् । मस्य वः ।) हिमालयपर्व्वतः । इत्यमरः । २ । ३ । ३ ॥ तत्कन्या गङ्गा । यथा,—
"गङ्गा हिमवतो जज्ञे सर्व्वलोकैकपावनी ।
स्वयोगाग्निबलाद्देवी लेभे पुत्त्रीं महेश्वरीम् ॥"
इति देवीपुराणे १२ अध्यायः ॥
हिमविशिष्टे, त्रि ॥

हिमवालुकः, पुं, (हिमस्य वालुका इव ।) कर्पूरः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"पुंसि क्लीवे च कर्पूरः सिताभ्रो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञः हिमनामापि सः स्मृतः ॥")

हिमवालुका, स्त्री,(हिमस्य वालुकेव ।) कर्पूरः । इत्यमरः । २ । ६ । १३० ॥ (यथा,—
"प्रमेहरोगे हिमवालुका च
मित्रं नृणां स्यात् सति मूत्रकृच्छ्रे ॥"
इति वैद्यकपथ्यविधौ मूत्रकृच्छ्राधिकारे ॥)

हिमशर्करा, स्त्री, (हिमस्य शर्करेव ।) यावनाली । इति राजनिर्घण्टः ॥

हिमशैलजा, स्त्री, (हिमशैलात् जायते इति । जन+डः ।) दुर्गा । इति शब्दरत्नावली ॥ (हिमालयोद्भवे,त्रि । यथा,याज्ञवल्क्ये ।३।१११
"एवमुक्त्वा विषं शार्ङ्गं भक्षयेत् हिमशैलजम् ॥")